# Gangakavacham

# गङ्गाकवचम्

## Document Information

Text title : Gangakavacha 2 Sarvarthasadhanabhidham

File name : gangAkavacham2.itx

Category : devii, nadI, kavacha, devI

Location : doc_devii

Transliterated by : Anil Kumar Pandey anil.kumar17pandey at gmail.com, Shree Devi Kumar

Proofread by : Anil Kumar Pandey, Shree Devi Kumar

Description-comments : Rudrayamala Tantra

Latest update : October 26, 2019

Send corrections to : Sanskrit@cheerful.com

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

June 8, 2021

*sanskritdocuments.org*

# गङ्गाकवचम्

विप्र उवाच-
कवचं ते प्रवक्ष्यामः पार्वत्यै यच्छिवोऽब्रवीत ।
यस्य सन्धारणान्मर्त्यः साक्षाद्वैश्रवणो भवेत् ॥ १॥

तद्यथा-
ॐ कैलासशिखरे रम्ये सुखासीनं सुरार्चितम् ।
गिरिशं गिरिजा नत्वा स्तोत्रैर्वेदार्थगर्भितैः ॥ २॥

प्रणम्य परया भक्त्या ततोऽपृच्छत् कृताञ्जलिः ।
श्रीमहादेव्युवाच-
महादेव सुराध्यक्ष करुणासागर प्रभो ॥

भवद्भिः शतसाहस्रकोटिवारं निवारिता ।
मह्यं किं किं न दत्तं ते तदिदानीं वदाम्यहम् ॥ ३॥

गाणपं शाक्तसूरं च शैवं वैष्णवमुत्तमम् ।
मन्त्रयन्त्रादिजालं हि मह्यं सामान्यतस्त्वया ॥ ४॥

दत्तं विशेषतो यद्यत्तत्सर्वं कथयामि ते ।
श्रीरामतारको मन्त्रः कोदण्डस्यापि मे प्रियः ॥ ५॥

नृहरेः श्यामराजो हि कालिकाद्याः प्रियंवद ।
दशविद्या विशेषेण षोडशी मन्त्रनायिका ॥ ६॥

दक्षिणामूर्तिसंज्ञोऽन्यो मन्त्रराजो धनाधिपः ।
सहस्रार्जुनकस्यापि मन्त्रा येऽन्ये हनूमतः ॥ ७॥

किं बहूक्तेन गिरिश प्रेमयन्त्रितचेतसा ।
अर्धाङ्गमिति मह्यन्ते दत्तं किं ते वदाम्यहम् ॥ ८॥

अपि पृच्छामि कवचं श्रीगङ्गाया अनुत्तमम् ।

मे मनस्तद्विना श्रीमन् न तुष्यति ततो वद ॥ ९॥

रहस्यं रक्षणकरं सर्वसम्पत्करं परम् ।
श्रीपरमशिव उवाच-
सत्यं सत्यं वरारोहे सर्वं दत्तं मया तव ॥ १०॥

परन्तु गिरिजे तुभ्यं कथ्यते शृणु साम्प्रतम् ।
कलौ पाखण्डबहुला नानावेशधरा नराः ॥ ११॥

ज्ञानलब्धा हीनकामा वर्णाश्रमबहिष्कृताः ।
वैष्णवत्वेन विख्याताः शैवत्वेन वरानने ॥ १२॥

शाक्तत्वेन च देवेशि सौरत्वेनेतरे जनाः ।
गाणपत्येन गिरिजे शास्त्रज्ञानविवर्जिताः ॥ १३॥

गुरुत्वेन समाख्याता विचरिष्यन्ति भूतले ।
ते शिष्यसङ्ग्रहं कर्तुमुधुक्ता यत्र कुत्रचित् ॥ १४॥

मन्त्राधुच्चारणे तेषां नास्ति सामर्थ्यमम्बिके ।
तच्छिष्याणां च गिरिजे तथापि जगतीतले ॥ १५॥

पठन्ति पाठयिष्यन्ति विप्रद्वेषपराः सदा ।
विप्रद्वेषरतानां हि नरके पतनं ध्रुवम् ॥ १६॥

शृणु देवि प्रवक्ष्यामि रहस्यातिरहस्यकम् ।
गङ्गायाः कवचं दिव्यं गोपनीयं त्वया सदा ॥ १७॥

न कस्यापि प्रवक्तव्यं वक्तव्यं स्वात्मिकाय तत् ।
प्रदर्शयति सर्वाङ्ग भर्तुर्वै स्त्रीजनो यथा ॥ १८॥

तस्मात्त्वया न वक्तव्यं कवचं लोकसुन्दरि ।
गङ्गायाः कवचस्यास्य वेदव्यासो ऋषिः स्मृतः ॥ १९॥

छन्दोऽतिजगती प्रोक्तं देवता तु सरित्स्मृता ।
धर्मार्थकाममोक्षेषु विनियोगः प्रकीर्तितः ॥ २०॥

प्रणवो मे शिरः पातु नमः पातु ललाटके ।
भगवति मे दृशौ पाहि कर्णौ ह्यम्बे ततोम्बिके ॥ २१॥

अम्बालिके महामालिनि पाहि नासापुटद्वये ।
कपोलौ मे सदा पाह्येओहि भगवत्यथ ॥ २२॥

मुखं में सततं रक्षेत् द्रवरूपा शुचिप्रभा ।
अशेषतीर्थालवाले हनुमेव सदाऽवतु ॥ २३॥

जिह्वामूले च जिह्वाग्रे ह्रौं श्री बीजौ सदाऽवताम् ।
शिवजटाधिरूढए च गङ्गे चोष्ठद्वयेऽवतु ॥ २४॥

दन्तपत्रौ च कण्ठे च पातु गङ्गाम्बिके द्विठः ।
स्कन्धौ मे ॐ नमः पातु शिवायै करयोर्मम ॥ २५॥

नारायण्यै च पार्श्वौ मे पायात्पापहरा सदा ।
स्वान्ते दशहरायै मे गङ्गायै चोदरेऽवतु ॥ २६॥

स्तनौ स्वाहा सदा पातु देवीर्भिहावतोषिता ॥

ॐ नमो भगवति पाहि कुक्षिं मे सर्वदा सुखम् ॥ २७॥

ऐं बीजं मध्यदेशे च बीजविद्या सदाऽवतु ।
हिलिः पृष्ठं सदा पातु पातु नाभिं हिलिर्मम ॥ २८॥

मिलिमिलीति पदद्वन्द्वं कटिं सडिक्थनीद्वयम् ।
गङ्गे मां पावयेदव्याद्गुह्ये जानुद्वये मम ॥ २९॥

जङ्घे स्वाहा सदा पातु गिरिनेत्राक्षरी सदा ।
सप्तार्णसहिता विद्या पादौ पातु नखाक्षरी ॥ ३०॥

ॐ हिलि-हिलि-मिलि-मिलि गङ्गे देविनमोभृशम् ।
मूर्धादिपादपर्यन्तं पातु पञ्चदशाक्षरी ॥ ३१॥

तारा माया रमा हार्दै प्राच्यां रक्षतु मे सदा ॥

आग्नेयां मां भगवती पातु मे चक्रसंस्थिता ॥ ३२॥

दक्षिणे गाङ्गदयिते नैर्ऋत्यां वर्मपूर्ववत् ।
प्रतीच्यामस्त्रतो रक्षेद्रिपुभारनिकृन्तनी ॥ ३३॥

वाग्भवं पातु वायव्यां माया रक्षतु चोत्तरे ।
ईशान्यां कमला रक्षेत् कामबीजं नभोऽवतु ॥ ३४॥

अधस्तात्पवनो रक्षेत्सर्वत्र सर्वमन्त्रराट् ।
मणिकर्णिभगी ब्रह्मा हृदयं ध्रुवसंयुता ॥ ३५॥

विषमिन्दुधुकः पूर्वं मन्त्रश्रीमणिकर्णिका ।
सर्वत्र मे सदा पातु बाह्याभ्यन्तरभेदतः ॥ ३६॥

इति ते कथितं देवि सारात् सारतरं परम् ।
सर्वार्थसाधनं नाम कवचं परमाद्भुतम् ॥ ३६॥

अस्यापि पठनात्सद्यः कुबेरोऽपि धनेश्वरः ।
इन्द्राद्याःसकला देवा धारणात्पठनाद्यतः ॥ ३७॥

सर्वसिद्धीश्वराः सन्तः सर्वैश्वर्यमवाप्नुयुः ।
पुष्पाञ्जल्यष्टकं दत्वा मूलेनैव पठेत्सकृत् ॥ ३८॥

संवत्सरकृतायास्तु पूजायाः फलमाप्नयात ।
प्रीतिमन्योन्यतः कृत्वा कमला निश्चला गृहे ॥ ३९॥

वाणीयं निवसेद्वक्रे सत्यं सत्यं न संशयः ।
यो धारयति पुण्यात्मा सर्वार्थसाधनाभिधम् ॥ ४०॥

कवचं परमं पुण्यं सोऽपि पुण्यवतां वरः ।
सर्वैश्वर्ययुतो भूत्वा त्रैलोक्यविजयी भवेत् ॥ ४१॥

पुरुषो दक्षिणे बाहौ नारी वामभुजे तथा ॥

बहुपुत्रयुतो भूयाद्वन्ध्यापि लभते सुतम् ॥ ४२॥

ब्रह्मास्त्रादीनि शस्त्राणि नैव कृन्तन्ति नाशनम् ।
गोपनीयं गोपनीयं गोपनीयं प्रयत्नतः ॥ ४३॥

इति श्रीरुद्रयामले पार्वतीश्वरसम्बादे सर्वार्थसाधनाभिधं
श्रीगङ्गाकवचवं सम्पूर्णम् ।

Encoded and proofread by Anil Kumar Pandey anil.kumar17pandey at gmail.com

*Gangakavacham*

pdf was typeset on June 8, 2021

Please send corrections to *sanskrit@cheerful.com*